**<u>मुख्यवार्ताः</u>**

- **रक्षामन्त्री राजनाथसिंहेन सीम- मार्ग- सङ्घटनेन (बीआरओ) षड्त्रिंशदुत्तर द्विशताधिक द्विसहस्र कोटिरूप्यकाणां व्ययेन निर्मितानां पञ्चसप्तति-आधारभूतपरियोजनानां उद्घाटनं कृतवान्।**
- **दक्षिण-रेलवे-चेन्नई-प्रविभाग-गुम्मिपिडिपुंडी-पार्श्वे कवरापेट्टई-क्षेत्रे ह्यः रात्रौ दुरापन्न-रेल-दुर्घटनायाः उच्च-स्तरीय-अन्वीक्षणादेशाः प्रदत्ताः। यातायातस्य पुनः प्रारब्धस्य कार्यं द्रुतगत्या प्रचल्यते।**
- **हरियाणा-प्रदेशे प्रशासनस्य शपथ-ग्रहण-समारोहः अक्तूबर सप्तदशे सम्पत्स्यते।**
- **विजयदशमी तथा दुर्गापूजनोत्त्सवः अद्य अशेषे देशे श्रद्धया उल्लासेन च सह आमान्यते।**
- **इजरायलविरुद्धं देशेन कृतानां प्रक्षेपास्त्र-आक्रमणानां आलोके अमेरिका-देशेन इरानस्य ऊर्जाव्यापारे प्रतिबन्धानां घोषणा कृता।**
- **पुरुषक्रिकेट्-क्रीडायां अद्य सायं हैदराबाद-नगरे तृतीयान्तिम-विंशतिं-प्रति-विंशतिः-अन्ताराष्ट्रीय-क्रीडायां भारतं बाङ्गलादेशं सम्मुखीकरिष्यति।**

**<u>अथ वार्ताः विस्तरेण</u>**

**रक्षामन्त्री राजनाथसिंहेन सीम-मार्ग**

रक्षामन्त्री राजनाथसिंहः सीम- मार्ग- सङ्घटनेन (बीआरओ) षड्त्रिंशदुत्तर द्विशताधिक द्विसहस्र कोटिरूप्यकाणां व्ययेन निर्मितानां पञ्चसप्तति- आधारभूतपरियोजनानाम् उद्घाटनं कृतवान्।

अद्य रक्षामन्त्रिणा सिक्किमराज्ये द्वाविंशतिः मार्गाः, एकपञ्चाशत् सेतवः द्वे अन्ये परियोजने च एतत् सर्वमुद्घाटितम्। एतानि परियोजनानि अण्डमान-निकोबार-द्वीपसमूहेन सह देशस्य एकादश सीमवर्ति-राज्येषु केन्द्रशासितेषु प्रदेशेषु च निर्मितानि सन्ति। अस्मिन् अवसरे रक्षामन्त्री राजनाथसिंहः अवदत् यत् चतुर्दशोत्तरद्विसहस्रतमवर्षे एनडीए प्रशासनस्य आगमनात् पूर्वं विकासस्य गतिर्निष्क्रिया जाता आसीत् तथा पूर्वोत्तर-सीमावर्ति-राज्यानि विकासस्य अवसरेभ्यः वञ्चितानि आसन्।

रक्षामन्त्रिणा मार्गसंपर्के निरन्तरवृद्धेः प्रशंसा व्यक्ता

## रेल-दुर्घटना

दक्षिण-रेलवे-चेन्नई-प्रविभाग-गुम्मपिडिपुंडी-पार्श्वे कवरापेट्टई-क्षेत्रे ह्यः रात्रौ दुरापन्न-रेल-दुर्घटनायाः उच्च-स्तरीय-अन्वीक्षणादेशाः प्रदत्ताः। मैसूर-दरभंगा-बागमती-एक्सप्रेस-पोन्नेरी क्षेत्रस्थलात् गच्छति स्म, तदैव-रेल-अपर-रेल-यानेन साकं संघट्टितं सञ्जातम्। अस्यां दुर्घटनायां कस्यापि क्षतेः सूचना नाधिगता। दुर्घटनायां अस्यां षोडश-यात्रिणः विभिन्नेषु चिकित्सालयेषु उपचर्यन्ते। दक्षिण-रेलवे-महाप्रबन्धकेणोक्तं यत् उच्च-स्तरीय-समितिद्वारा-अन्वीक्षणानां परिणामानन्तरं दुर्घटनायाः कारणानि अन्वीक्ष्यन्ते। तेनोक्तं यत् यातायातस्य पुनः प्रारब्धस्य कार्यं द्रुतगत्या प्रचल्यते। रेलवे-सुरक्षा-आयुक्त-ए०एम० चौधरिणा अद्य कावराईपेट्टई-वर्येण-दुर्घटना-स्थलस्य वैधानिकं निरीक्षणं विहितम्। राष्ट्रिय-आपद्-मोचन-बलस्य-सहायतायै यातायात-पुनः प्रारब्ध-कार्यं प्रचल्यते।

## हरियाणा-प्रशासन-संरचनम्

हरियाणा-प्रदेशे प्रशासनस्य शपथ-ग्रहण-समारोहः गुरुवासरे-पञ्चकुलायां सम्पत्स्यते। हरियाणायाः पर्वू मुख्यमन्त्रिणा मनोहर-लाल-खट्टरेण एतस्य पुष्टिं कुर्वता प्रोक्तं यत् प्रधानमन्त्रिणा एतस्य स्वीकृतिः प्रदत्ता। मन्त्रिपरिषदः च अक्तूबरे सप्तदशे दिनांके पञ्चकुलायां शपथं स्वीकरिष्यन्ते। हरियाणायां विधानसभेय निर्वाचनेषु भारतीय-जनता-पर्टीति दलेन तृतीय-वारं-विजयधिगतम्। नवतिः सदस्यीय विधानसभायां भाजपा दलेन अष्टचत्वारिंशत् विधानसभेय आसनानि विजितानि, कांग्रेस दलेन च सप्तत्रिंशत् आसनानि विजितानि। इण्डियन-नेशनल-लोकदलेन आसनद्वयं विजितम्। पञ्च-निर्दलीय-प्रत्याशिनः विजयं अधिगतवन्तः। मुख्यमन्त्रिणा नायब-सिंह-सैनिना लाडवा-आसनं, पूर्व-मुख्यमन्त्रिणा भूपेन्द्र-सिंह-हुड्डा वर्येण गढ़ी-सांपला-किलोई आसनं विजितम्।

## विजयदशमी – दुर्गापूजनोत्त्सवः

विजयदशमी तथा दुर्गापूजनोत्त्सवः अद्य अशेषे देशे श्रद्धया उल्लासेन च सह आमान्यते। यः असति सतः विजयस्य प्रतीकमस्ति। राष्ट्रपतिः द्रौपदी मुर्मूः, उपराष्ट्रपतिः जगदीप धनखडः, प्रधानमन्त्री नरेंद्रमोदी च उत्सवस्य शुभकामनाः देशवासिभ्यः प्रदत्तवन्तः। उत्सवः महता हर्षेण आचर्यते। पश्चिमबंगालस्य दुर्गापूजा- महोत्सवः अद्य समाप्तिम् एति, यत्र सिन्दूरक्रीडनेन धुनुचीनृत्येन च सह मूर्तीनां विसर्जनं भवति।

श्रीलङ्कायाम् भारतीय-सांस्कृतिक-सङ्घेन अपि महाष्टमी - पर्व कोलंबो नगरस्य श्री-मनिक-विनायक-कोविल-मन्दिरे भक्त्या उत्साहेन च ह्यः समाचरितम्।

रक्षामन्त्री राजनाथसिंह: अद्य दार्जिलिङ्गस्थ- सुकना -छावन्यां शस्त्रपूजनं कृत्वा भारतीय-सैन्यस्य सैनिकैः सह विजयदशमी - पर्व आचरितवान्, यः अस्य दिनस्य प्राचीन-परम्परा अस्ति।

## विजयदशमी – आरएसएस

राष्ट्रिय-स्वयं सेवक-संघ-प्रमुखेण मोहन-भागवतेन महिला: विरूद्धय अत्याचारेषु दु:खं प्रकटितम्। तेनोक्तं यत् कोलकाताया: आर जी कर – चिकित्सालये लज्जाप्रद-अपमानजनक-घटनासु अपराध-राजनीते: मध्ये सामञ्जस्य परिणामोऽस्ति। डॉ० भागवतेनाद्य राष्ट्रीय-स्वयंसेवकसंघस्य नव नवतितमे स्थापना-दिवसे नागपुरे विजयदशम्या: मुख्य-संबोधनं प्रकटितम्। तेनोक्तं प्रत् सांस्कृतिक-मूल्यानां अपचयन-कारणात् ओटीटी-मञ्च: उत्तरदायि-वर्तते। एतदर्थं विधि द्वारा नियन्त्रणस्य आवश्यकता विद्यते।

## विराम:

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

## अमेरिका-ईरान/प्रतिबन्धः –

इजरायलं विरुद्धय देशेन कृतानां प्रक्षेपास्त्र-आक्रमणानां आलोके अमेरिका-देशेन इरानस्य ऊर्जाव्यापारे प्रतिबन्धानां घोषणा कृता। अमेरिकीय-कोष-विदेशविभागेन च ह्यः प्रतिबन्धानां घोषणा कृता। अमेरिकीविदेशसचिवः एण्टनी ब्लिङ्कनेन उक्तं यत् अमेरिकादेशः तस्य राजस्वप्रवाहं बाधितुं उपायान् कुर्वती अस्ति यस्य उपयोगं इरान: स्वीय परमाणुकार्यक्रमस्य कृते कुर्वन् आसीत्।

**प्रधानमन्त्री-इन्टर्नशिप-योजना;**

चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य प्रधानमन्त्री इन्टर्नशिप इति व्यवासायिक-प्रशिक्षण-योजनायाः पञ्जीकरणप्रक्रिया अद्य सायं पञ्च वादनात् आरभ्यते। अस्मिन् वर्षे आय-व्यय संकल्पना-पत्रस्य प्रस्तुतेः पूर्वं घोषिता उपक्रमेण यूनां वास्तविकजीवने व्यापारवातावरणेषु हस्तगत-अनुभवं प्राप्तुं सहयोगाय द्वादश मासस्य प्रशिक्षणं प्रदास्यति ।

**वित्त-आयोग-अनुदानः**

केन्द्र-प्रशासनेन आन्ध्र-प्रदेश, राजस्थान-राज्ययो: ग्रामीण-स्थानीय-निकाया: प्रवर्तमान-वित्तीय वर्षाय कृते पञ्चदश-तमीये वित्त-आयोग-अनुदानस्य प्रथम-देय मूल्यं प्रसारितम्। पञ्चायती-राज्य-मन्त्रालयेनोक्तं यत् आन्ध्रप्रदेशाय आहत्य त्रिशत-षण्णवति-कोट्यात्मक-आधारभूत-अनुदानं, अथ च पञ्चशत-त्रिण्णवति-कोट्यरूप्यकात्मकस्य बद्धानुदानं निश्चितम्। धनराशे: अयं आन्ध्रप्रदेशे विधिवत्-निर्वाचित-नव-पात्र-जनपद-पञ्चायतानां कृते, पञ्चदशोत्तर-षट्शत-पात्र-खण्ड-पञ्चायतानाञ्कृते, त्रि-पञ्चाशदुत्तर-अष्टशतोत्तर-द्वादश-सहस्राधिक-राशि: ग्राम-पञ्चायतानां कृते अनुमोदित:।

**राष्ट्रपतिः**

राष्ट्रपतिः द्रौपदी मुर्मुः श्वः प्रभृति अक्टूबरमासस्य नवदशदिनाङ्कपर्यन्तम् अल्जीरिया-मौरिटानिया, मलावी एतेषाम् त्रयाणां राष्ट्राणां यात्रायाः निमित्तं प्रस्थानम् करिष्यति। एषा भारतस्य राष्ट्रपतिना त्रयाणां अफ्रीकीय राष्ट्राणां प्रथमयात्रा भविष्यति।

यात्रायाः प्रथमसोपाने राष्ट्रपतिः श्वः प्रभृति: अक्टूबरमासस्य पञ्चदशदिनांकपर्यन्तम् अल्जीरियायाः यात्रां करिष्यति। यात्रायाः समये राष्ट्रपतिः द्रौपदी मुर्मूः अल्जीरियायाः राष्ट्रपतिना अब्दुलमद्जिद-तेबून इत्यनेन सह द्विपक्षीयम् वार्तालापं करिष्यति। राष्ट्रपतिः भारत-अल्जीरिया -आर्थिक-मञ्चं सिदी-अब्दुल्लाह-साईंस टेकनोलोजी - पोल -विश्वविद्यालयं च अपि सम्बोधयिष्यति। सा यात्रायाः द्वितीयसोपाने राष्ट्रपतिः द्रौपदी मुर्मुः अक्टूबर षोडशे मौरिटानियायाः यात्रां करिष्यति। एषा यात्रा तस्मिन् महत्त्वपूर्णकाले क्रियते यदा मौरिटानिया अफ्रीकी-सङ्घस्य अध्यक्षतां वहति। यात्रायाः समये राष्ट्रपतिः मौरिटानियायाः राष्ट्रपतिना मोहम्मद औलद शेख अल-गजौनी इत्यनेन सह द्विपक्षीय-वार्तालापं करिष्यति। राष्ट्रपतिः भारतीय-प्रवासिभिः सह संवादं अपि करिष्यति। यात्रायाः अन्तिमसोपाने राष्ट्रपतिः द्रौपदी मुर्मुः सप्तदशतः अक्टूबरतः नवदश-अक्टूबरपर्यन्तं मलाव्याः यात्रां

करिष्यति। यात्रायाः मुख्यः उद्देश्यः अफ्रीकायाः राष्ट्रैः सह भारतस्य सम्बन्धानां अधिकं सुदृढीकरणम् अस्ति।

**प्रशासन-औषधम्**

प्रशासनेनोक्तं यत् आपत्कालीन-गर्भरोधक-औषधस्य विक्रयण-वितरण-नियंत्रित-नियमेषु परिवर्तनं नैव विहितम्। औषधय: एता: चिकित्सकस्य पत्रंविना उपलब्धा: भविष्यन्ति।

**भारत बाङ्ग्लादेशः-**

भारतेन बाङ्ग्लादेशसर्वकारं निवेदितं यत् सः सर्वेषां अल्पसंख्याकानां, तेषां पूजास्थलानां च सुरक्षां सुनिश्चितं करोतु, विशेषतः उत्सवकालेस्मिन्। विदेशमन्त्रालयेन विज्ञप्तौ ढाकायाः तांतिबाजारे एकस्मिन् पूजामण्डपे आक्रमणस्य, सतखीरायाः प्रतिष्ठिते जेशोरेश्वरीकालीमन्दिरस्य च चौर्यप्रकरणे गम्भीरचिन्ता प्रकटिता।

**संस्कृत-साप्ताहिकी**

**प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धेक- वादनतः भविष्यति। कृपया श्रृष्वन्तु भवन्तः सर्वे श्रोतु प्रभवन्ति। भवति, आशिसे भवन्तः प्रति निवास- श्रीष्यन्तीति।**

**पुरुषक्रिकेट्-**

पुरुषक्रिकेट्-क्रीडायां अद्य सायं हैदराबाद-नगरे तृतीयान्तिम-विंशतिं-प्रति-विंशतिः-अन्तर्राष्ट्रीय-क्रीडायां भारतं बाङ्ग्लादेशं सम्मुखीकरिष्यति। त्रिषु क्रीडाश्रृङ्खलासु द्वे-शून्यं-इत्यंकान्तरालेन भारतं अग्रे अस्ति। अवधेयं वर्तते यत् दिल्ल्याम् आयोजिते द्वितीये द्वन्द्वे भारतेन बाङ्ग्लादेशं षडशीतिः धावनांकैः पराजितम् आसीत्।

**।।इति वार्ता:।।**